# Shri Gayatri Stotram 1

# શ્રીગાયત્રીસ્તોત્રમ્ ૧

## Document Information

Text title : Gayatri Stotram 1

File name : gaayatriistotra.itx

Category : devii, gAyatrI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : WebD

Proofread by : Satish Bharadwaj, Samskrit Samvadah

Description-comments : vasiShThasa.nhita

Latest update : October 16, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2023

*sanskritdocuments.org*

# શ્રીગાયત્રીસ્તોત્રમ્ ૧

નમસ્તે દેવિ ગાયત્રિ સાવિત્રિ ત્રિપદેઽક્ષરે ।
અજરે અમરે માતસ્ત્રાહિ માં ભવસાગરાત્ ॥ ૧॥

નમસ્તે સૂર્યસઙ્કાશે સૂર્યસાવિત્રિ કોમલે ।
બ્રહ્મવિદ્યે મહાવિદ્યે વેદમાતર્નમોસ્તુ તે ॥ ૨॥

અનન્તકોટિબ્રહ્માણ્ડવ્યાપિનિ બ્રહ્મચારિણિ ।
નિત્યાનન્દે મહામાયે પરેશાનિ નમોસ્તુ તે ॥ ૩॥

ત્વં બ્રહ્મા ત્વં હરિઃ સાક્ષાદ્રુદ્રસ્ત્વમિન્દ્રદેવતા ।
મિત્રસ્ત્વં વરુણસ્ત્વં ચ ત્વમગ્નિરશ્વિનૌ ભગઃ ॥ ૪॥

પૂષાર્યમા મરુત્વાંશ્ચ ઋષયોઽપિ મુનીશ્વરાઃ ।
પિતરો નાગયક્ષાશ્ચ ગન્ધર્વાપ્સરસાં ગણાઃ ॥ ૫॥

રક્ષોભૂતપિશાચાશ્ચ ત્વમેવ પરમેશ્વરિ ।
ઋગ્યજુસ્સામવેદાશ્ચ અથર્વાઙ્ગિરસાનિ ચ ॥ ૬॥

ત્વમેવ પઞ્ચભૂતાનિ તત્ત્વાનિ જગદીશ્વરિ ।
બ્રાહ્મી સરસ્વતી સન્ધ્યા તુરીયા ત્વં મહેશ્વરિ ॥ ૭॥

ત્વમેવ સર્વશાસ્ત્રાણિ ત્વમેવ સર્વસંહિતાઃ ।
પુરાણાનિ ચ મન્ત્રાણિ મહાગમ મતાનિ ચ ॥ ૮॥

તત્સદ્બ્રહ્મસ્વરૂપા ત્વં કઞ્ચિત્સદસદાત્મિકા ।
પરાત્પરેશિ ગાયત્રિ નમસ્તે માતરમ્બિકે ॥ ૯॥

ચન્દ્રે કલાત્મિકે નિત્યે કાલરાત્રિ સ્વધે સ્વરે ।
સ્વાહાકારેઽગ્નિવક્ત્રે ત્વાં નમામિ જગદીશ્વરિ ॥ ૧૦॥

નમો નમસ્તે ગાયત્રિ સાવિત્રિ ત્વાં નમામ્યહમ્ ।
સરસ્વતિ નમસ્તુભ્યં તુરીયે બ્રહ્મરૂપિણિ ॥ ૧૧॥

અપરાધસહસ્રાણિ ત્વસત્કર્મશતાનિ ચ ।
મત્તો જાતાનિ દેવેશિ ત્વં ક્ષમસ્વ દિને દિને ॥ ૧૨॥

॥ ઇતિ વસિષ્ઠસંહિતાયાં ગાયત્રીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Satish Bharadwaj, Samskrit Samvadah

*Shri Gayatri Stotram 1*
pdf was typeset on October 16, 2023

Please send corrections to *sanskrit@cheerful.com*